रागं: सिन्धुभैरवि　　　　　　　　　　　　　　　ताळम्: आदि

सकलं हॆसखि जानामि तत्
प्रकट विलासं परमं धधसॆ

1. अलिक मृगमदमय मषीकलनॊ
ज्वलतां हॆसखि जानामि
ललितं तव पल्लवित मनसि नि-
श्चलतर मॆघश्यामं धधसॆ

2. चारु कपॊलस्थल कराञ्चित वि-
चारं हॆसखि जानामि
नारायण महिनायक शयनम्
श्रीरमणं तव चित्तॆ धधसॆ

3. घनकुच शैलाग्रस्थित विधुमणि
जननं हॆसखि जानामि
कनदुरसा वॆङ्कटगिरिपतॆ-
र्विनुत भॊगसुख विभवं धधसॆ